ललितानित्यसपर्यापद्धति



खेमराज श्रीकृष्णदास प्रकाशन, बम्बई.

अथ

श्रीललितानित्यसपर्या-
पद्धतिप्रारंभः ।

संस्करण : जनवरी २००४, सम्वत् २०६०

मूल्य : ५ रुपये मात्र।

मुद्रक एवं प्रकाशकः
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers :
Khemraj Shrikrishnadass,
Prop: Shri Venkateshwar Press,
Khemraj Shrikrishnadass Marg, 7th Khetwadi,
Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s. Khemraj Shrikrishnadass Proprietors Shri Venkateshwar Press, Mumbai - 400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013.

श्रीगणेशाय नमः ॥ श्रीगुरुसच्चिदानंदनाथाय नमः ॥

श्रीसुन्दरीं च कामेशं सद्गुरुं च विनायकम् । नत्वा वदामि ललिता सपर्यापद्धतिं क्रमात् ॥ अथ साधकः कृतमङ्गलस्नानः पूजागृहमागत्य मंदिरद्वारोर्ध्वभागे । ॐ ऐं ह्रीं श्रीं भद्रकाल्यै नमः । दक्षे ॐ ऐं ह्रीं श्रीं भैरवाय नमः । वामे ॐ ऐं ह्रीं श्रीं लंबोदराय नमः । इति पूजयित्वा अंतः प्रविश्य बालातृतीयबीजेन सौः इत्यनेन द्वादशवारमभिमंत्रिते मूलमंत्रोक्षिते चित्रकंबलाद्यन्यतम आसने । ॐ ऐं ह्रीं श्रीं आधारशक्तिकमलासनाय नमः। इति पुष्पाक्षतैरभ्यर्च्य प्राङ्मुखउदङ्मुखो वा उपविश्य प्राणानायम्य देशकालौ संकीर्त्य मम श्रीललितांबाप्रीत्यर्थं यथाशक्ति सपर्याक्रमं निर्वर्तयिष्ये इति संकल्प्य ॥ ॐ ऐं ह्रीं श्रीं समस्तगुप्तप्रकटसिद्धयोगिनीचक्रश्रीपादुकाभ्यां नमः । इति स्व

ल०स० मूर्ध्निबद्धाञ्जलिः। ॐ ऐं ह्रीं श्रीं ह्स्ख्फ्रें हसक्षमलवरयूं सहक्षम
॥२॥ लवरयीं ह्सौं स्हौः श्रीगुरुश्रीपादुकां पूजयामि। इति मंत्रांते
सुमुखवृत्तचतुरस्रमुद्गरयोन्याख्याभिः पंचमुद्राभिः श्रीगुरुम्॥
ॐ श्रीं ह्रीं क्लीं ग्लौं गंगणपतये वरवरद सर्वजनं मे वशमानय
स्वाहा। इति मंत्रेण महागणपतिं च। स्ववामदक्षिणयोः क्रमेण
प्रणम्य। ऐं हः अस्त्राय फट्। इत्यस्त्रमंत्रेण अङ्गुलिना प्रदक्षि
णीकृत्य उदकोपस्पर्शः। ततो जलपूर्णं वर्धनीपात्रं स्ववामभागे
गंधपुष्पाक्षतादिसपर्यासामग्रीं स्वदक्षिणदेशे क्षीरकलशादिकं
देव्याः पश्चाद्भागे निधाय दीपान् अभितः प्रज्वालयेत्॥ ततः
पद्धति० स्वपुरतः प्रक्षालितपीठोपरिस्थितश्रीचक्रे॥ ॐ ऐं ह्रीं श्रीं
मूलेन पुष्पांजलिं दत्त्वा ॐ ऐं ह्रीं श्रीं मूलप्रथमखंडं नमः इति
त्रिकोणस्य स्वाग्रकोणम्॥ ॐ ऐं ह्रीं श्रीं मूलद्वितीयखंडं नमः

इति ईशानकोणम् ॥ ॐ ऐं ह्रीं श्रीं मूलतृतीयखंडं नमः इत्या
ग्नेयकोणमभ्यर्च्य भूतशुद्धिं विदध्यात् । अथ भूतशुद्धिः ॥
पिंगलया ३ वायुमंतराकृष्य । ३ मूलशृंगाटकात्सुषुम्नापथेन
जीवशिवं परमशिवपदे योजयामि स्वाहा । इतिमूलाधारस्थितं
जीवात्मानं सुषुम्नावर्त्मना ब्रह्मरंध्रं नीत्वा । परमशिवेनैकीभूतं
भावयित्वा । इडया पापपुरुषं विरेचयेत् । ३ यं संकोचश
रीरं शोषय शोषय स्वाहा । इति निजशरीरं शोषितम् । रं स
ङ्कोचशरीरं दहदह पचपच स्वाहा । इतिभस्मीकृतम् । ३ वं प
रमशिवामृतं वर्षय वर्षय स्वाहा । इति अमृतवर्षितम् ॥ ३ लं
शांभवशरीरमुत्पादयोत्पादय स्वाहा । इति तद्भस्मना दिव्यं
शरीरमुत्पन्नं भावयेत् । ३ हंसः सोहम् । अवतरावतर शिवप
दाज्जीवसुषुम्नापथेन प्रविश्यमूलशृंगाटकमुल्लसोल्लस ज्वलज्वल

ल०स० प्रज्वलप्रज्वल हंसः सोहं स्वाहा । इति परशिवेनैकीकृतं जीवं
पुनः सुषुम्नावर्त्मना मूलाधारे स्थापितं विचिंतयेत् ॥ इति
॥३॥ भूतशुद्धिः ॥ अथ प्राणप्रतिष्ठा ॥ ॐ आं सोहम् । इति मंत्रं
हृदि दक्षकरं निधाय त्रिः पठेत् । गर्भाधानादिपंचदशसंस्कार
सिद्ध्यर्थं पंचदशप्रणवावृत्तीः करिष्ये । ततः त्रिवारं प्राणाना
यम्य । अपसर्पंतु ते भूता ये भूता भूमिसंस्थिताः । ये भूता
विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया । इतिमंत्रेण भूमिं वामपादेन
त्रिस्ताडयेत् । अथ नमः इत्यङ्गुष्ठमंत्रमुच्चारयन् कुशेन शिखां
बद्धा श्रीदेवीरूपमात्मानं भावयन् स्वदेहे न्यासजालात्मकं वज्र
पद्धतिः कवचं विदधीत ॥ न्यासाश्च । अस्य श्रीमातृकान्यासस्य ब्रह्मणे
ऋषये नमः शिरसि । गायत्र्यैछंदसे नमः मुखे । श्रीमातृकास
रस्वत्यै देवतायै नमः हृदये ॥ हल्भ्यो बीजेभ्यो नमः गुह्ये ।

स्वरेभ्यः शक्तिभ्यो नमः पादयोः। बिंदुभ्यः कीलकेभ्यो नमः नाभौ। मम श्रीविद्यांगत्वेन न्यासे विनियोगः। करसंपुटे सर्वे तुसर्वमातृकया त्रिव्यापकं सर्वांगे अञ्जलिना ॐ ऐं ह्रीं श्रीं ऐं क्लींसौः अँ कँ खँ गँ घँ ङँ आं अंगुष्ठाभ्यां नमः॥ ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः इँ चँ छँ जँ झँ ञँ ईं तर्जनीभ्यां नमः॥ ६ उँ टँ ठँ डँ ढँ णँ ऊँ मध्यमाभ्यां वषट्॥ ६ एँ तँ थँ दँ धँ नँ ऐं अनामिकाभ्यां हुम्॥ ६ ओं पँ फँ बँ भँ मँ औं कनिष्ठिकाभ्यां वौषट्॥ ६अँ यँ रँ लँ वं शँ षं सं हं ळं क्षं अः करतलकरपृष्ठाभ्यां फट्॥ एवं हृदयादिषडङ्गः॥ पंचाशद्वर्णैरचिताङ्गभागां धृते न्दुखण्डां कुमुदावदाताम्। वराभये पुस्तकमक्षसूत्रं भजे गिरं संदधतीं त्रिनेत्राम्॥ इति ध्यात्वा॥ मनसा संपूज्य पुष्पांजलिं दत्त्वा। मातृका न्यसेत्। ६ अं नमः शिरसि॥ ६ आं नमः मुखे॥

ल०स० ह्इं नमः दक्षनेत्रे ॥ ह् ईं नमः वामनेत्रे॥ह् उं नमः दक्षकर्णे ॥
ह्ऊं नमः वामकर्णे ॥ ह् ऋं नमः दक्षिणनासापुटे॥ह् ॠं नमः
॥४॥ वामनासापुटे ॥ ह् लृं नमः दक्षगंडे ॥ह् ॡं नमः वामगंडे॥ह्
एं नमः उर्ध्वौष्ठे ॥ ह् ऐं नमः अधरोष्ठे ॥ ह् ओं नमः ऊर्ध्वदं
तपङ्क्तौ ॥ ह् औं नमः अधोदंतपङ्क्तौ ॥ ह् अं नमः शिरसि ॥
ह् अः नमः मुखांतः ॥ह् कं नमः दक्षबाहुमूले॥ह् खं नमः तन्म
ध्यसंधौ ॥ ह् गं नमः मणिबंधे ॥ ह् घं नमः तदंगुलिमूले ॥
ह् ङं नमः तदंगुल्यग्रे ॥ह् चं नमः वामबाहुमूले ॥ह् छं नमः
तन्मध्यसंधौ ॥ ह् जं नमः तन्मणिबंधे ॥ ह् झं नमः
पद्धतिः तदंगुलिमूले ॥ ह् ञं नमः तदंगुल्यग्रे ॥ ह् टं नमः
दक्षोरुमूले ॥ ह् ठं नमः तज्जानुनि ॥ ह् डं नमः तज्ज
ङ्घापादसंधौ ॥ ह् ढं नमः तदंगुलिमूले ॥ ह् णं नमः तदंगु

ल्यग्रे ॥ ६ तं नमः वामोरुमूले ॥ ६ थं नमः तज्जानुनि ॥६ दं
नमः तज्जंघापादसंधौ॥ ६ धं नमः तदंगुलिमूले ॥६ नं नमः तदं
गुल्यग्रे ॥६ पं नमः दक्षपार्श्वे ॥ ६ फं नमः वामपार्श्वे॥ ६ बं नमः
पृष्ठे॥ ६ भं नमः नाभौ॥ ६ मं नमः जठरे॥६ यं नमः हृदि ॥
६ रं नमः दक्षकक्षे ॥६ लं नमः अपरगले॥ ६ वं नमः वामकक्षे॥
६ शं नमः हृदादिदक्षकराग्रान्तम् ॥ ६ षं नमः हृदादिवामक
राग्रान्तम्॥६ सं नमः हृदादि दक्षपादाग्रान्तम्॥६ हं नमः हृदादि
वामपादाग्रांतम् ॥ ६ ळं नमः हृदादिगुह्यांतम् ॥ ६ क्षं नमः
हृदादिमूर्धांतम् ॥ अथ करशुद्धिः॥ ऐं ह्रीं श्रीं अं मध्यमाभ्यां
नमः ॥ ३ आं अनामिकाभ्यां नमः ॥ ३ सौः कनिष्ठिकाभ्यां
नमः ॥ ३ अं अङ्गुष्ठाभ्यां नमः ॥ ३ आं तर्जनीभ्यां नमः ॥
३ सौः करतलकरपृष्ठाभ्यां नमः ॥ अथात्मरक्षान्यासः ॥३ ऐं

ल०स० क्लीं सौः श्रीमहात्रिपुरसुन्दर्यात्मानं रक्ष रक्ष इति हृदये अंजलिं
॥५॥ दद्यात्॥अथ चतुरासनन्यासः॥३ ह्रीं क्लीं सौः देव्यात्मासनाय
नमः इति स्वस्य मूलाधारे न्यस्य॥३ हैं हक्लीं हसौः श्रीचक्रा
सनाय नमः ॥ ३ हसैं हक्लीं हसौः सर्वमंत्रासनाय नमः ॥३ह्रीं
क्लीं ब्लें साध्यासिद्धासनाय नमः इतित्रिभिर्मंत्रैर्मुहुर्मुहुः पुष्पप्र
क्षेपणेन चक्रमंत्रदेवतासनानि श्रीचक्रे न्यसेत् ॥ अथ बालाष
डङ्गन्यासः ॥ ३ ऐं हृदयाय नमः ॥ ३ क्लीं शिरसे स्वाहा ॥
३ सौः शिखायै वषट् ॥३ ऐं कवचाय हुम् ॥३ क्लीं नेत्रत्रयाय
वौषट् ॥ ३ सौः अस्त्राय फट् ॥ अथ वाग्देवतान्यासः ॥ ३ अं
पद्धतिः आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः रब्लूं वशिनी
वाग्देवतायै नमः शिरसि। ३ कं खं गं घं ङं कलह्रीं कामेश्वरी
वाग्देवतायै नमः ललाटे ॥ ३ चं जं झं ञं रब्लीं मोदिनीवाग्दे

वतायै नमः भ्रूमध्ये ॥ ३ टं ठं डं ढं णं प्लूं विमलावाग्देवतायै नमः कंठे॥३ तं थं दं धं नं ज्म्रीं अरुणावाग्देवतायै नमःहृदि॥ ३ पं फं बं भं मं हस्ल्व्यूं जयनी वाग्देवतायै नमः. नाभौ॥ ३ यं रं लं वं झ्म्यूं सर्वेश्वरीवाग्देवतायै नमः लिंगे ॥ ३ शं षं सं हं लं क्षं क्ष्म्रीं कौलिनीवाग्देवतायै नमः ॥ इतिमूलाधारे न्यसेत् ॥ अथमूलार्णन्यासः ॥ ३ कं नमः शिरसि ॥ ३ एं नमः मूले ॥ ३ ईं नमः हृदि ॥ लं नमः दक्षनेत्रे ॥ ३ ह्रीं नमः वामनेत्रे ३ हं नमः भ्रूमध्ये ॥ ३ सं नमः दक्षश्रोत्रे ॥३ कं नमः वामश्रोत्रे ॥ ३ हं नमः मुखे ॥ ३ लं नमः दक्षभुजे ॥ ३ ह्रीं नमः वामभुजे ॥ ३ सं नमः पृष्ठे ॥ ३ कं नमः दक्षजानुनि ॥ ३ लं नमः वामजानुनि ॥ ३ ह्रीं नमः नाभौ इति न्यासांश्च विधाय ॥ ऐं ह्रीं श्रींदीपनाथाय नमः इति दीपपूजां कृत्वा

पूजामारभेत ॥ अथ चक्रराजे मंदिरपूजा ॥ ३ अमृतांभोनिधये नमः ॥ ३ रत्नद्वीपाय नमः॥नानावृक्षमहोद्यानाय नमः॥ ३कल्पवाटिकायै नमः ॥ ३ संतानवाटिकायै नमः ॥ ३ हरिचंदनवाटिकायै नमः ॥ ३ मंदारवाटिकायै नमः ३ पारिजातवाटिकायै नमः ॥ ३ कदंबवाटिकायै नमः ॥ ३ पुष्परागरत्नप्राकाराय नमः ॥ ३ पद्मरागरत्नप्राकाराय नमः ॥ ३ गोमेदरत्नप्राकाराय नमः ॥ ३ वज्ररत्नप्राकाराय नमः॥ ३वैडूर्यरत्नप्राकाराय नमः ॥ ३ इंद्रनीलरत्नप्राकाराय नमः ॥ ३ मुक्तारत्नप्राकाराय नमः ॥ ३ मरकतरत्नप्राकाराय नमः॥ ३विद्रुमरत्नप्राकाराय नमः ॥ ३ माणिक्यमंडपाय नमः ॥३ सहस्रस्तंभमंडपाय नमः ॥ अमृतवापिकायै नमः ॥३ आनंदवापिकायै नमः ॥ ३ विमर्शवापिकायै नमः ॥ ३ बालातपोद्गा

राय नमः ॥ ३ चांद्रिकोद्गाराय नमः ॥ ३ महाश्रृंगारपरिखायै नमः ॥ ३ महापद्माटव्यै नमः ॥ ३ चिंतामणिगृहराजाय नमः ॥ ३ पूर्वाम्नायमयपूर्वद्वाराय नमः ॥ ३ दक्षिणाम्नायमयदाक्षिण द्वाराय नमः ॥ ३ पश्चिमाम्नायमयपश्चिमद्वाराय नमः ॥ ३ उत्तराम्नायमयउत्तरद्वाराय नमः ॥ ३ रत्नप्रदीपवलयाय नमः ॥ ३ मणिमयमहासिंहासनाय नमः ॥ ३ ब्रह्ममयैकमंचपादाय नमः ॥ ३ विष्णुमयैकमंचपादाय नमः ॥ ३ रुद्रमयैकमंचपादाय नमः ॥ ३ ईश्वरमयैकमंचपादाय नमः ॥ ३ सदाशिवमंचफलकाय नमः ३ हंसतूलतल्पिमाय नमः ॥ ३ हंसतूलमहोपधानाय नमः ॥ ३ कौसुंभस्तरणाय नमः ॥ ३ महावितानकाय नमः ॥ ३ महावनिकाय नमः इति मंदिरपूजां कृत्वा ॥ पात्रासादनं कुर्यात्। स्वस्य वामतो देव्याः पुरतो गंधाक्षतकुसु

ल०स० मार्जितेन त्रिवारमूलमंत्राभिमंत्रितेन वर्धनीपात्रगतेन शुद्धनां
॥७॥ भस्मा भुवि बिंदुत्रिकोणषट्कोणवृत्तचतुरस्रात्मकं मण्डलं परि
कल्प्य मत्स्यमुद्रां प्रदर्श्य पुष्पैरभ्यर्च्य चतुरस्रस्य अग्नीशान
निर्ऋतिवायुकोणेषु मध्य पूर्वादिदिक्षु च क्रमेण त्रितारिपूर्वक
बालाषडंगमंत्रैः षडंगं पूजयेत् ॥ (अत्र पूर्वादिदिक्षु चतसृषु
एकमेवास्त्रं ज्ञेयम्) तत्र मण्डले ॥ ३ अस्त्राय फट् इति क्षालित
माधारम् ॥ ३ मं अग्निमंडलाय दशकलात्मने अर्घ्यपात्राधाराय
नमः। इति संस्थाप्य तत्र ॥ ३ यं धूम्रार्चिषे नमः ॥ ३ रं
ऊष्मायै नमः ॥ ३ लं ज्वलिन्यै नमः ॥ ३ वं ज्वालिन्यै नमः॥
पद्धतिः ३ शं विस्फुलिंगिन्यै नमः ॥ ३ षं सुश्रियै नमः ॥ ३ सं सुरू
पायै नमः ॥ ३ हं कापिलायै नमः ॥ ३ ळं हव्यवाहायै नमः॥
३ क्षं कव्यवाहायै नमः ॥ ३ इति दशकलाः संपूज्य आधा

रोपरि अस्त्रेण क्षालितं शंखम् ॥ ३ अंसूर्यमंडलाय द्वादश-
कलात्मने अर्घ्यपात्राय नमः । इति प्रतिष्ठाप्य ॥ ३ कं भं
तापिन्यै नमः ॥ ३ खं बं तापिन्यै नमः ॥ ३ गं फं धूम्रायै
नमः ॥ ३ घं पं मरीच्यै नमः ॥ ३ ङं नं ज्वालिन्यै नमः ॥
३ चं धं रुच्यै नमः ॥ ३ छं दं सुषुम्नायै नमः ॥ ३ जं थं
भोगदायै नमः ॥ ३ झं तं विश्वायै नमः ॥ ३ ञं णं बोधिन्यै
नमः ॥ ३ टं ढं धारिण्यै नमः ॥ ३ ठं डं क्षमायै नमः ।
इति तत्र द्वादशकलाः संपूज्य तस्मिन् शंखे ३ ऊं सोम
मंडलाय षोडशकलात्मने अर्घ्यामृताय नमः । इति कर्पूरादि
वासितेन सलिलेन वर्धनीमा पूर्य क्षीरबिंदुं दत्त्वा तत्र ॥३ अं
अमृतायै नमः॥३ आं मानदायै नमः॥३ इं पूषायै नमः ॥३ ईं
तुष्ट्यै नमः॥३ उं पुष्ट्यै नमः॥३ ऊं रत्यै नमः॥३ ऋं धृत्यै

नमः॥३ ॠं शशिन्यै नमः॥३ ऌं चंद्रिकायै नमः॥३ ॡं
कांत्यै नमः॥ एं ज्योत्स्नायै नमः॥३ ऐं श्रियै नमः॥३ ओं
प्रीत्यै नमः॥३ औं अंगदायै नमः॥३ अं पूर्णायै नमः॥३ अः
पूर्णामृतायै नमः॥३ इति षोडशकलाः संपूज्य । पूर्ववद्विदिक्षु
मध्ये दिक्षु च॥३ क ५ हृदयाय नमः हृदयशक्तिश्रीपादुकां
पूजयामि॥३ ह ४ शिरसे स्वाहा शिरःशक्तिश्रीपा०॥३ स ४
शिखायै वषट् शिखाशक्तिश्रीपा०॥ ३ क ५ कवचाय हुं कव
चशक्तिश्रीपा०॥३ ह ६ नेत्रत्रयाय वौषट् नेत्रशक्तिश्रीपादु०
॥३ स ४ अस्त्राय फट् अस्त्रशक्तिश्रीपा०॥ इति क्रमेण पुष्पैः
षडङ्गानि समर्चयत्॥ अथ॥३ अस्त्रेण संरक्ष्य॥ ३ कवचेन अव
गुंठनमुद्रया अवगुंठ्य॥ धेनुयोनिमुद्रे प्रदर्श्य ॥ मूलेन सप्तवार
मभिमंत्र्य तत्सलिलपृषतैरात्मानं पूजोपकरणानि च संप्रोक्ष्य

शंखगतजलात्किंचिद्वर्धन्यां क्षिपेत् ॥ इतिसामान्यार्घ्यविधिः ॥
अथ विशेषार्घ्यस्थापनम् । सामान्यार्घ्योदकेन तद्दक्षिणतः
बिंदुत्रिकोणषट्कोणवृत्तचतुरस्रात्मकं मण्डलं परिकल्प्य ॥
बिंदौ सानुस्वारं तुरीयस्वरमालिख्य चतुरस्रे प्राग्वत्षडंगं
विन्यस्य ॥ कूटत्रयेण त्रिकोणकोणान्यभ्यर्च्य । पुरोभागादि
प्रादक्षिण्येन कूटत्रयद्विरावृत्त्या षट्कोणकोणांश्च क्रमेण कुसु
मादिभिरभ्यर्च्य । तत्र मंडले । ३ ऐं अग्निमंडलाय दशकला
त्मने अर्घपात्राधाराय नमः ॥ इत्याधारमाधाय तत्र प्रागुक्त३
यं धूम्रार्चिषे नमः । इत्यादिदशअग्निकलाः संपूज्य । तदुपरि
स्वर्णादिनिर्मितपात्रम् ३ क्लीं सूर्यमंडलाय द्वादशकलात्मने
अर्घ्यपात्राय नमः। इति मंत्रेण निधाय तत्र । ३ ह्रीं ऐं महाल
लक्ष्मीश्वरी परमस्वामिन्यूर्ध्वशून्यप्रवाहिणि सोमसूर्याग्नि

ल०स० भक्षिणि परमाकाश भासुरे आगच्छागच्छ विशविश पात्रं प्रति
गृह्णप्रतिगृह्ण हुं फट् स्वाहा । इति पुष्पाञ्जलिं विकीर्य प्रागु
॥९॥ क्तकंभं तापिन्यै नमः इत्यादि द्वादशसूर्यकलाः संभाव्य तत्र ॥
३ सौः सोममंडलाय षोडशकलात्मने अर्घ्यामृताय नमः। इति
मंत्रेण कलशगतं कस्तूरिकाद्याधिवासितं क्षीरमभिपूर्य तत्र सुर
भिफलं कुसुममार्द्रकशकलं च निक्षिप्य प्रागुक्त अंअमृतायै
नमः इत्यादि षोडशसोमकलाः यजेत् ॥ तत्र विशेषार्घ्यामृते
स्वाग्रादिप्रादक्षिण्येन अकथादि षोडशवर्णात्मकं रेखात्रयं
त्रिकोणं विलिख्य । तदंतः स्वाग्रादिकोणेषु प्रादक्षिण्येन हं
पद्धतिः ळं क्षं बहिश्च मूलखंडत्रयम् बिंदौ साबिंदु तुर्यस्वरम् तद्वामद
क्षयोः क्रमेण हं सः इति च वर्णौ विलिख्य ॥ ३ हं सः नमः इति
मंत्रेणाराध्य त्रिकोणस्य परितो वृत्तं निष्पाद्य। तद्बहिश्च षट्

कोणं निर्माय स्वाग्रादिप्रादक्षिण्येन। ३ क ५ हृदयाय नमः हृदय शक्तिश्रीपादुकां पूजयामि ॥ ३ ह ६ शिरसे स्वाहा शिरः शक्तिश्रीपादु०॥३ स ४ शिखायै वषट् शिखाशक्तिश्रीपादु०॥ ३ क ५ कवचाय हुं कवचशक्तिश्रीपा० ॥ ३ ह ६ नेत्रत्रयाय वौषट्। नेत्र शक्तिश्रीपादु०॥ ३ स ४ अस्त्राय फट् अस्त्रशक्ति श्रीपादु०॥ इति षडङ्गमंत्रैः षडंगयुवतीरभिपूज्य॥ ३ मूलांते तां चिन्मयीमानंदलक्षणाममृतकलशोत्पलहस्तद्वयां प्रसन्नां देवीं पूजयामि नमः स्वाहा। इति सुधादेवीमभ्यर्च्य तदर्घं किंचित्पात्रांतरेण ३ वषडित्युद्धृत्य॥३ स्वाहेति निक्षिप्य। ३ हुमित्यवगुंठ्य ॥३ वौषडिति धेनुमुद्रयामृतीकृत्य। ३ फडिति संरक्ष्य ॥३ नम इति पुष्पं दत्त्वा ॥ गालिनिमुद्रया॥ ३ मूलेन निरीक्ष्य। योनिमुद्रया नत्वा ॥ ३ मूलेन सप्तवारमभिमंत्र्य

ल०स० गंधाक्षतपुष्पधूपदीपान्दत्त्वा विशेषार्घ्यामृतेनात्मानं पूजोपकर

॥१०॥ णानि प्रोक्षयेत् ॥ ततः विशेषार्घ्यपात्रं करेण संस्पृश्य मंत्रै

रभिमंत्रयेत् । मंत्राश्च । ३ यं धूम्रार्चिषे नमः ॥३ रं ऊष्मायै

नमः। ३ लं ज्वालिन्यै नमः। ३ वं ज्वालिन्यै नमः॥ ३ शं वि

स्फुलिंग्यै नमः॥ षं सुश्रियै नमः॥ ३ सं सुरूपायै नमः ॥ ३

हं कपिलायै नमः ॥ ३ ळं हव्यवाहायै नमः ॥ ३ क्षं कव्यवा

हायै नमः॥ ३ कं भं तापिन्यै ममः॥ ३ खं बं तापिन्यै नमः॥

३ गं फं धूम्रायै नमः॥ ३ घं पं मरीच्यै नमः॥ ३ ङं नं ज्वा

लिन्यै नमः॥ ३ चं धं रुच्यै नमः॥ ३ छं दं सुषुम्नायै नमः॥

पद्धतिः ३ जं थं भोगदायै नमः ॥ ३ झं तं विश्वायै नमः ॥ ३ ञं णं

बोधिन्यै नमः॥ ३ टं ढं धारिण्यै नमः॥ ३ ठं डं क्षमायै नमः॥

३ अं अमृतायै नमः॥ ३ आं मानदायै नमः॥ ३ इं पूषायै नमः॥३

ईं तुष्ट्यै नमः ॥ ३ उं पुष्ट्यै नमः ॥ ३ ऊं रत्यै नमः ॥३ ऋं
धृत्यै नमः ॥ ३ ॠं शशिन्यै नमः ॥ ३ लृं चंद्रिकायै नमः ॥
३ लॄं कांत्यै नमः ॥ ३ एं ज्योत्स्नायै नमः ॥ ३ ऐं श्रियै
नमः ॥ ३ ओं प्रीत्यै नमः ॥ ३ औं अंगदायै नमः ॥ ३ अं
पूर्णायै नमः ॥ ३ अः पूर्णामृतायै नमः ॥ ३ सृष्ट्यै नमः ॥
ऋद्ध्यै नमः ॥ ३ स्मृत्यै नमः ॥ ३ मेधायै नमः ॥ ३ कांत्यै
नमः ॥ ३ लक्ष्म्यै नमः ॥ ३ द्युत्यै नमः ॥ ३ स्थिरायै नमः॥
३ स्थित्यै नमः ॥ ३ सिद्ध्यै नमः ॥ ३ जनायै नमः ॥ ३
पालिन्यै नमः ॥ ३ शांत्यै नमः ॥ ३ ईश्वर्यै नमः ॥ ३ रत्यै
नमः ॥ ३ कामिकायै नमः ३ वरदायै नमः ॥ ३ ह्लादिन्यै
नमः ॥ ३ प्रीत्यै नमः ॥ ३ दीर्घायै नमः ॥ ३ तीक्ष्णाय नमः
॥ ३ रौद्र्यै नमः ॥ ३ भयायै नमः ॥ ३ निद्रायै नमः तंद्र्यै

नमः ॥ ३ क्षुधायै नमः ॥ ३ क्रोधिन्यै नमः ॥ ३ क्रियायै नमः
॥ ३ उत्कार्यै नमः ॥ ३ मृत्यवे नमः ॥ ३ पीतायै नमः ॥ ३
श्वेतायै नमः ॥ ३ अरुणायै नमः ॥ ३ असितायै नमः ॥ ३
निवृत्त्यै नमः ॥ ३ प्रतिष्ठायै नमः ॥ ३ विद्यायै नमः ॥
३ शांत्यै नमः ॥ ३ इंधिकायै नमः ॥ ३ दीपिकायै नमः ॥
३ रेचिकायै नमः ३ मोचिकायै नमः ॥ ३ परायै नमः ॥ ३ सूक्ष्मायै
नमः ॥ ३ सूक्ष्मामृतायै नमः ॥ ३ ज्ञानायै नमः ॥ ३ ज्ञाना
मृतायै नमः ॥ ३ आप्यायिन्यै नमः ॥ व्यापिन्यै नमः ॥ ३ व्योम
रूपायै नमः ॥ ३ हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथि

दुरोणसत्॥नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतं
बृहत् ॥ ३ प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुचरोगिरिष्ठाः ॥
यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वा॥ ३ त्र्यंबकं

यजामहेसुगंधिंपुष्टिवर्धनम् ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीय
मामृतात् ॥ ३ तद्विष्णोःपरमपदंसदापश्यंतिसूरयः ॥ दिवी
वचक्षुराततं ॥ ३ तद्विप्रासोविपन्यवोजागृवांसःसमिंधते ॥
विष्णोर्यत्परमंपदं ॥ ३ विष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिं
शतु ॥ आसिंचतुप्रजापतिर्धातागर्भं दधातुते ॥ गर्भंधेहिसिनी
वालिगर्भं देहि सरस्वति ॥ गर्भंते अश्विनौदेवावाधत्तां पुष्क
रस्रजा ॥ ३ अखंडैकरसानंदपरे परसुधात्मनि ॥ स्वच्छंदस्फु
रणामत्रनिधेह्यकुलनायिके ॥ ३ अकुलस्थामृताकारेशुद्धज्ञान
करेपरे ॥ अमृतं त्वं निधेह्यस्मिन्वस्तुनि क्लिन्नरूपिणि ॥ ३
तद्रूपिण्यै करस्यत्वं कृत्वा ह्येतत्स्वरूपिणी ॥ भूत्वा परामृता
कारा मयि चित्स्फुरणं कुरु ॥३ ऐं प्लूं स्रौं जूं सः अमृते अमृतो
द्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावयस्रावय स्वाहा॥ ३ ऐं

ल०स० वदवद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरुकुरु
ह्सौं स्हौः ॥ इत्येतैर्मंत्रैराभिमंत्रयित्वा ॥ तद्विशेषार्घ्यामृता
॥१२॥ त्पात्रांतरे किंचिदुद्धृत्य तद्बिंदुभिस्त्रिवारं श्रीगुरुपादुकामंत्रेण
शिरसि गुरुं यजेत्। संनिहिताय तु पूजापुरःसरं निवेदयेत् ॥
स्वयं च शरीरशुद्ध्यर्थं देवीभावं स्वात्मानं भावयन् मूलेन
आत्मनः कुंडलिनीरूपे चिदग्नौ होमबुद्ध्या जुहुयात् विशेषार्घ्यं
पात्रात्किंचित्क्षीरकलशे निक्षिपेत्। आविसर्जनं शंखं विशेषा
र्घ्यपात्रं न चालयेत् ॥ इदमर्घ्यपात्रद्वयं सूक्तरीत्या श्रीक्रमे
नान्यत्॥इति विशेषार्घ्यस्थापनविधिः॥अथ पूजा॥स्वशिरसि
पद्धतिः कुसुमगर्भितेञ्जलिना त्रिखंडमुद्रया ॥ ३ ह्रीं श्रीं सौः श्रीललि
ताया अमृतचैतन्यमूर्तिं कल्पयामि नमः इति मंत्रमुच्चारयन्
निजलीलांगीकृतललितवपुषं विचिंत्य ॥ ३ ह्स्रैं ह्स्क्लीं ह्स्रौः

महापद्मवनांतस्थे कारणानंदविग्रहे ॥ सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥इति मंत्रेण बिंदुपीठगतनिर्विशेषब्रह्मात्मकश्रीकामेश्वरांके परदेवतामावाहयेत ॥ ततः मूलेन ३ श्रीललिते आवाहिता भव ॥ ३ संस्थापिता भव ॥ ३ संनिहिता भव॥ ३ संनिरुद्धा भव ॥ ३ संमुखीकृता भव ॥ ३ अवगुंठिता भव ॥ षडङ्गमंत्रमुच्चार्य ॥ ३ संकलीकृता भव ॥ धेनुमुद्रया देवी मूर्ध्नि ३ अमृती कृता भव ॥३ परमीकृता भव ॥ ३ प्रार्थिता भव॥ वंदनयोनिमुद्रे प्रदर्शयेत् ॥ मूलांते श्रीललिता त्रिपुरसुन्दरीं तर्पयामि नमः ॥ इति त्रिः सामान्यजलेन संतर्प्य ॥ तेनैव जलेन पाद्याद्युपचारान्निवेदयेत ॥ ३ श्रीललितायै नमः पाद्यं कल्पयामि ॥ ३ श्रीललि॰ अर्घ्यं॰ ॥ ३ श्रीललि॰ आचमनी॰ ॥ ३ श्रीललि॰सुगंधतैलाभ्यंगं परि॰ ॥ ३ श्रीललि॰ उष्णोदक

ल०प्र०	स्नानं प० ॥ ३ श्रीललि० पंचामृतं० ॥ ३ श्रीललि० महाभिषेकं
॥१३॥	परिकल्पयामि इह श्रीसूक्तरुद्रादीनामभिषेकः ॥ ३ श्रीललि०
वस्त्रं० ॥ ३ श्रीललि० कंचुकीं० ॥ ३ श्रीललि० मंगलसूत्रादि
सर्वाभरणं० ॥ ३ श्रीललि० हरिद्राकुंकुमं प० ॥ ३ श्रीललि०
गंधं० ॥ ३ श्रीललि० अक्षता० ॥ ३ श्रीललि० पुष्पाणि परि० ॥
३ श्रीललि० किरीटकुंडलं० ॥ ३ श्रीललि धूपं० ॥ ३ श्रील०
दीपं प० ॥ ३ श्रीललि० मूलेन नैवेद्यं० ॥ ३ श्रीललि० तांबू
लं० ॥ ३ श्रीललि० मंगलनीराजनं दीपं० ॥ ३ श्रीललि० मंत्रपुष्पं
ततः संक्षोभिण्यादिनवमुद्राः बाणादिचतुरायुधमुद्राः प्रदर्श्य ॥
पद्धतिः	मूलेन विशेषार्घ्यामृतेन देवीं त्रिः संतर्प्य संपूज्य योनिमुद्रया
प्रणमेत् ॥ संविन्मये परे देवि परामृतचरुप्रिये । अनुज्ञां
त्रिपुरे देहि परिवारार्चनाय मे ॥ श्रीचक्रस्य मध्यात्त्रिकोणे वामा

वर्तिन ॥ ३ कामेश्वरी नित्या श्रीपादुकां पूजयामि तर्पयामि
नमः ॥ ३ भगमालिनी नित्या श्री० ॥ ३ नित्यक्लिन्ना नित्या
श्री० ॥ ३ भेरुंडा नित्या श्री० ॥ ३ वह्निवासिनी नित्या श्री
पा० ॥ ३ महावज्रेश्वरी नित्या श्री० ॥ ३ शिवदूती नित्या
श्री० ॥ ३ त्वरिता नित्या श्री० ॥ ३ कुलसुंदरी नित्या श्री
पा० ॥ ३ नित्यानित्या श्री० ॥ ३ नीलपताकिनी नित्या
श्री० ॥ ३ विजया नित्या श्री० ॥ ३ सर्वमंगला नित्या श्री
पा० ॥ ३ ज्वालामालिनी नित्या श्री० ॥ ३ चित्रा नित्या श्री० ॥
ततः मूलत्रिकोणांतर्भागेषु ॥ ३ परमप्रकाशानंदनाथश्री० ॥
३ परमशिवानंदनाथश्री० ॥ ३ पराशक्त्यंबा श्री० ॥
३ कौलेश्वरानंदनाथश्री० ॥ ३ शुक्लदेव्यंबा श्री० ॥ ३ कुले
श्वरानंदनाथ श्री० ॥ ३ कामेश्वर्यंबा श्री० ॥ इति दिव्योऽघः ॥

ल०ध० स्नानं प० ॥३ श्रीललि० पंचामृतं०॥३ श्रीललि० महाभिषेकं
॥१३॥ परिकल्पयामि इह श्रीसूक्तरुद्रादीनामभिषेकः ॥ ३ श्रीललि०
वस्त्रं० ॥ ३ श्रीललि० कंचुकीं० ॥ ३ श्रीललि० मंगलसूत्रादि
सर्वाभरणं० ॥ ३ श्रीललि० हरिद्राकुंकुमं प० ॥ ३ श्रीललि०
गंधं०॥३ श्रीललि० अक्षता०॥३ श्रीललि० पुष्पाणि परि०॥
३ श्रीललि० किरीटकुंडलं० ॥३ श्रीललि धूपं० ॥ ३ श्रील०
दीपं प० ॥ ३ श्रीललि० मूलेन नैवेद्यं० ॥ ३ श्रीललि० तांबू
लं०॥ ३ श्रीललि० मंगलनीराजनं दीपं०॥३ श्रीललि० मंत्रपुष्पं
ततः संक्षोभिण्यादिनवमुद्राः बाणादिचतुरायुधमुद्राः प्रदर्श्य ॥
पद्धतिः मूलेन विशेषार्घ्यामृतेन देवीं त्रिः संतर्प्य संपूज्य योनिमुद्रया
प्रणमेत् ॥ संविन्मये परे देवि परामृतचरुप्रिये । अनुज्ञां
त्रिपुरे देहि परिवारार्चनाय मे॥ श्रीचक्रस्य मध्यात्रिकोणे वामा

र्तिन ॥ ३ कामेश्वरी नित्या श्रीपादुकां पूजयामि तर्पयामि
नमः ॥ ३ भगमालिनी नित्या श्री० ॥ ३ नित्यक्लिन्ना नित्या
श्री० ॥ ३ भेरुंडा नित्या श्री० ॥ ३ वह्निवासिनी नित्या श्री
पा० ॥ ३ महावज्रेश्वरी नित्या श्री० ॥ ३ शिवदूती नित्या
श्री० ॥ ३ त्वरिता नित्या श्री० ॥ ३ कुलसुंदरी नित्या श्री
पा० ॥ ३ नित्यानित्या श्री० ॥ ३ नीलपताकिनी नित्या
श्री० ॥ ३ विजया नित्या श्री० ॥ ३ सर्वमंगला नित्या श्री
पा० ॥ ३ ज्वालामालिनी नित्या श्री० ॥ ३ चित्रा नित्या श्री० ॥
ततः मूलत्रिकोणांतर्भागेषु ॥ ३ परमप्रकाशानंदनाथश्री० ॥
३ परमशिवानंदनाथश्री० ॥ ३ पराशक्त्यंबा श्री० ॥
३ कौलेश्वरानंदनाथश्री० ॥ ३ शुक्लदेव्यंबा श्री० ॥ ३ कुले
श्वरानंदनाथ श्री० ॥ ३ कामेश्वर्यंबा श्री० ॥ इति दिव्यौघः ॥

ल०स० ३ भोगानंदनाथश्री० ॥ ३ क्लिन्नानंदनाथ श्री० ॥ ३ समयानंद
॥१४॥ नाथश्री० ॥ ३ सहजानंदनाथश्री० ॥ इति सिद्धार्घः ॥ ३ ग
गनानंदनाथ श्री० ॥ ३ विश्वानंदनाथश्री० ॥ ३ विमलानंद
नाथश्री० ॥ ३ मदनानंदनाथश्री० ॥ ३ भुवनानंदनाथश्री०॥
३ लीलानंदनाथश्री० ॥ ३ स्वात्मानंदनाथश्री० ॥ ३ प्रिया
नंदनाथश्री० ॥ इति मानवोऽर्घः ॥ स्वशिरसि गुरुं त्रिर्यजेत् ॥
अथ नवावरणपूजामारभेत ॥ चतुरस्रप्रथमरेखायाम् ॥ ३ अ
णिमासिद्धिश्रीपादुकां पूजयामि तर्प० । ३ लघिमासिद्धिश्री०॥
३ महिमासिद्धिश्री० ॥ ३ ईशत्वासिद्धिश्री० ॥ ३ वश
पद्धतिः त्वासिद्धिश्री० ॥ ३ प्राकाम्यासिद्धिश्री० ॥ ३ भुक्तिसिद्धिश्री०
३ इच्छासिद्धिश्री० ॥ ३ प्राप्तिसिद्धिश्री० ॥ ३ सर्वकामासि
द्धिश्री० ॥ मध्यरेखायाम् ॥ ३ ब्राह्मीश्री० ॥ ३ माहेश्वरीश्री०

३ कौमारीश्री० ॥ ३ वैष्णवीश्री० ॥ ३ वाराहीश्री० ॥ ३ इंद्राणीश्री० ॥ ३ चामुंडाश्री० ॥ ३ महालक्ष्मीश्री ० अंत्यरेखायाम् ॥ ३ द्रां संक्षोभिणीमुद्राश्रीपा० ३ ३ क्लीं सर्वाकर्षिणीश्री० ॥ ३ ब्लूं सर्ववशंकरीश्री० ॥ ३ सः सर्वोन्मादिनीमुद्राश्रीपा० ॥ ३ ह्सौं सर्वबीजमुद्राश्री० ॥ ३ ऐं सर्वयोनिमुद्राश्री० ॥ ३ ह्स्रैं ह्स्क्लीं ह्स्रौः सर्वत्रिखंडमुद्राश्री० ॥ ३ मूलेन त्रिवारं संपूज्य संतर्प्य । एताः प्रकटयोगिन्यः ॥ त्रैलोक्यमोहनचक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः संतु ॥ इति पुष्पांजलिं दत्त्वा ॥ ३ द्रां संक्षोभिणीमुद्रां प्रदर्शयेत् ॥ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ षोडशदले देव्यग्रदलमारभ्य ॥ ३ कामाकर्षिणीश्री० ॥ ३

बुद्ध्याकर्षिणीश्री० ॥ ३ अहंकारकर्षिणीश्री ० ॥ ३ शब्दा
कर्षिणीश्री ० ॥ ३ स्पर्शाकर्षिणी श्री ० ॥ ३ रूपा
कर्षिणीश्री० ।३ रसाकर्षिणीश्री पा० ॥३ गंधाकर्षिणीश्री०॥
३ चित्ताकर्षिणीश्री० ॥ ३ धैर्याकर्षिणीश्री० ॥ ३ स्मृत्या
कर्षिणीश्री० ॥ ३ नामाकर्षिणीश्री० ॥ ३ बीजाकर्षिणीश्री०
आत्माकर्षिणीश्री० ॥ ३ अमृताकर्षिणीश्री० ॥ ३ शरीराक
र्षिणीश्री० ॥मूलेन त्रिवारं संपूज्य संतर्प्य एताः गुप्तयोगिन्यः
सर्वाशापरिपूरकचक्रे समुद्राः० संतु ॥ ३ द्रीं सर्वविद्राविणी
मुद्रां प्रदर्शयेत् अभीष्ट० द्वितीयावरणार्चनम् ॥ देव्याः अष्टदले
३ अनङ्गकुसुमाश्री० ॥ ३ अनङ्गमेखलाश्री० ॥ ३अनङ्ग
मदनाश्री० ॥ ३ अनङ्गमदनातुराश्री०॥ ३ अनङ्गरेखाश्री० ॥
३ अनंगवेगिनीश्री० ॥ ३ अनङ्गाङ्कुशाश्री० ॥ ३ अनंगमालि

नीश्री० ॥ ३ मूलेन त्रिवारं संपूज्य संतर्प्य ॥ एताः गुप्ततरयो
गिन्यः सर्वसंक्षोभणचक्रे समुद्राः० संतु ॥ ३ क्लीं सर्वाकर्षिणी
मुद्रां प्रदर्शयेत् ॥ अभीष्ट०तृतीयावरणार्चनम् ॥ देव्याः चतुर्द
शारे देव्यग्रकोणमारभ्य वामावर्तेन॥ ३ सर्वसंक्षोभिणी श्री०॥
३ सर्वविद्राविणीश्री० ॥ ३ सर्वाकर्षिणीश्री० ॥ ३ सर्वाह्लादि
नीश्री० ॥ ३ सर्वसंमोहिनीश्री० ॥ ३ सर्वस्तंभिनीश्री० ॥
३ सर्वजृंभिणीश्री० ॥ ३ सर्ववशंकरीश्री० ॥ ३सर्वरंजिनीश्री०
३ सर्वोन्मादिनीश्री० ॥ ३ सर्वार्थसाधिनी श्री० ॥ ३ सर्व
संपत्तिपूरिणीश्री० ॥ ३ सर्वमंत्रमयीश्री० ॥ ३ सर्वद्वंद्वक्षयंकरी
श्री० ॥ मूलेन त्रिः ॥ एताः संप्रदाययोगिन्यः सर्वसौभाग्यदा
यकचक्रे समु० संतु॥ ३ ब्लूं सर्ववशंकरीमुद्रां प्रदर्शयेत्॥ अभी
ष्ट०चतुर्थावरणार्चनम् ॥ देवीबहिर्दशारे ॥ ३ सर्वसिद्धि

ल०स० प्रदाश्री० ॥ ३ सर्वसंपत्प्रदाश्री० ॥ ३ सर्वप्रियंकरीश्री० ॥
॥१६॥ ३ सर्वमंगलकारिणीश्री० ॥३ सर्वकामप्रदाश्री० ॥३ सर्वदुःख
विमोचिनीश्री० ॥ ३ सर्वमृत्युप्रशमनीश्रीपा० ३ सर्व
विघ्ननिवारिणीश्री० ॥ ३ सर्वांगसुंदरी श्रीपा० ॥ ३ सर्व
सौभाग्यदायिनीश्री० ॥ मूलेन त्रिः । एताः कुलोत्तीर्णयोगिन्यः
सर्वार्थसाधकचक्रे समु०संतु ॥ ३ सः सर्वोन्मादिनीमुद्रां प्रद
र्शयेत्॥ अभीष्ट०पंचमावरणार्चनम् ॥ अंतर्दशारे देव्यग्रकोण
मारभ्य वामावर्तेन ॥ ३ सर्वज्ञा श्री० ॥३ सर्वशक्ति श्री० ॥
३ सर्वैश्वर्यप्रदायिनिश्री० ॥ ३ सर्वज्ञानमयीश्री० ३ सर्वव्या
पद्धतिः धिविनाशिनीश्री० ॥ ३ सर्वाधारस्वरूपाश्री० ॥ ३ सर्वपाप
हराश्री० ॥३ सर्वानंदमयीश्री० ॥३ सर्वरक्षास्वरूपिणीश्री०॥
३ सर्वेप्सितफलप्रदाश्री० ॥ मूलेन त्रिः ॥ एताः गुप्तयो

गिन्यः सर्वरक्षाकरचक्रे समु॰संतु ॥ क्रों सर्वमहाङ्कुशमुद्रां प्रद-
र्शयेत्॥ अभीष्ट॰षष्ठावरणार्चनम् ॥ अष्टारे ॥ ३ वशिनीवा
ग्देवताश्री॰ ॥३ कामेश्वरीवा॰श्री॰ ॥ ३ मोदिनीवा॰श्री॰
३ विमलावाग्देवता॰ श्री॰ ॥ ३ अरुणावाग्देवताश्री॰ ॥ ३
जयिनीवाग्दे॰ श्री॰ ॥ ३ सर्वेश्वरी वा॰ श्री॰ ॥ ३ कौलि
नीवाग्दे॰श्री॰३ मूलेन त्रिः॥ एताःरहस्ययोगिन्यः सर्वरोगहर
चक्रे समुद्रा॰ संतु॰ ॥ ३ हस्रैं खेचरीमुद्रां प्रदर्शयेत्
अभीष्ट॰ सप्तमावरणार्चनम् ॥ देव्याः चतुर्दिक्षु ॥३ द्रां द्रीं क्लीं
ब्लूं सः सर्वजृंभणबाणेभ्यो नमः ॥ ३ थं सर्वसंमोहनाय धनुषे
नमः ॥ ३ ह्रीं सर्ववशीकरणाय पाशाय नमः ॥ ३क्रों सर्वस्तं
भनायांकुशाय नमःत्रिकोणे॥३मूलप्रथमखंडं कामेश्वरीश्रीपा॰
३ मूलद्वितीयखंडं वज्रेश्वरीश्री॰ ॥ ३ मूलतृतीयखंडं भगमा

ल० स० ॥१७॥

लिनीश्री० ॥ बिंदौ मूलेन त्रिः ॥ एताः अतिरहस्ययोगिन्यः सर्वसिद्धिप्रदचक्रे समु० संतु० ॥ ३ ह्स्रौं सर्वबीजमुद्रां प्रदर्शयेत्॥ अभीष्ट०अष्टमावरणार्चनम् ॥ बिंदौ॥३ मूलं श्रीललितांबाश्री०॥ मूलेन त्रिः॥ एषापरापररहस्ययोगिनी सर्वानंदमयचक्रे समुद्रा ससिद्धिः सायुधा सशक्तिः सवाहना सपरिवारा सर्वोपचारैः संपूजितास्तु ॥ ३ ऐं महायोनिमुद्रां प्रदर्शयेत् ॥ अभीष्ट० नवमावरणार्चनम् ॥ पुनः देव्यै मूलेन धूपदीपादिकं दत्वा महानैवेद्यं समर्पयेत् ॥ततः कुलदीपः॥ अंतेस्तेजो बहिस्तेज एकीकृत्यामितप्रभम् ॥ त्रिधा दीपं परिभ्राम्य कुलदीपं निवेदयेत् ॥ इति जानुचुंबितभूतलः सन् । जयध्वनिमंत्रमातः स्वाहा ॥ इति घंटां संपूज्य वामकरेण वादयन् देव्यै कुलदीपेन आरार्तिकं कृत्वा ॥ ततः मंत्रपुष्पम्॥ शिवे शिवप्रशांत

पद्धतिः

लामृततरंगगन्धोल्लसन्नवारणदेवते नवनवामृतस्पंदिनि ॥ गुरु क्रमपुरस्कृते गुणशरीरानित्योज्वले षडंगपारिवारिते कलित एष पुष्पांजलिः ॥ इति पुष्पांजलिं दत्त्वा ॥ अथ बलिः ॥ देव्या दक्ष भागे त्रिकोणवृत्तचतुरस्रमंडलं निमार्य ॥ ३ ऐं व्यापकमंडलाय नमः इति संपूज्य ॥ तत्र पात्रत्रयं चर्वणं च संस्थाप्य ॥ ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं स्वाहा ॥ इति मंत्रं त्रिः पठित्वा दक्ष करार्पितं वामकरतत्त्वमुद्रास्पृष्टं सलिल बल्युपरि दत्त्वा वामपार्ष्णिभूतलाघातकरस्फोटौ कुर्वाणः समुदंचितवक्त्रः बाणमुद्रया बलिं भूतैः ग्राहितं विभाव्य प्रणमेत् ॥ ततः यथाशक्ति मूलं जप्त्वा योनिमुद्रया प्रणमेत् ॥ ततः सहस्रनामादिस्तोत्रं पठेत् ॥ अथ सुवासिनीपूजा ॥ अदीक्षिता शक्तिरस्ति चेत् प्रथमतः तस्याः शोधनं कार्यम् ॥ शोधनविधिः ॥ ऐं क्लीं सौः त्रिपुरायै

नमः ॥ इमां शक्तिं पवित्रां कुरु कुरु मम शक्तिं कुरु कुरु स्वाहा ॥
ल०स० इति अभिषेकमंत्रेण त्रिरावृत्तिसामान्यसलिलेन शक्तिं प्रोक्ष्य ॥
॥१८॥ ॐ शांतिरस्तु शिवं चास्तु प्रणश्यत्वशुभं च यत् ॥ एत एवा
गतं पापं तत्रैव प्रतिगच्छतु ॥ इत्युच्चार्य तस्याः कर्णे हृल्लेखां
जपेत् इति ॥ अथसुवासिन्याः पादद्वयं स्पृष्ट्वा प्रणम्य पंचमुद्राः
प्रदर्शयित्वा ॥ बालामंत्रेण षोडशोपचारैः पूजयेत् ॥ ततः
अलिपात्रमिदं तुभ्यं दीयते पिशितान्वितम् ॥ स्वीकृत्य सुभगे
देवि जयं देहि रिपुं दह ॥ सापि तत्सावशेषं स्वीकृत्य ॥ वत्स
तुभ्यं मया दत्तं पीतशेषं कुलामृतम् ॥ त्वच्छत्रून्संहरिष्यामि
पद्धतिः सर्वाभीष्टं ददामि ते इति प्रदद्यात् ॥ अथ संनिहिते गुरौ ते पादु
कामंत्रेणाभिपूज्य पात्राणि समर्पयेत् ॥ ततः सर्वैः सह श्रीना
थादि० ॥ समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलिनिगर्भरह

स्यातिरहस्यपरापररहस्ययोगिनीचक्रश्रीपादुकाभ्यो नमः ॥
इति समष्टिमंत्रेण श्रीचक्रे पुष्पांजलिं दद्यात् ॥ततः यथाविधि
पूर्वकं पात्राणि स्वीकुर्यात्॥ततः सामान्योदकेन॥साधु वा साधु
वा कर्म यद्यदाचरितं मया ॥ तत्सर्वं कृपया देवि गृहाणाराधनं
मम॥देवीवामहस्ते पूजां समर्पयेत् ॥ ततः मूलेन शंखमुद्धृत्य
चक्रोपरि त्रिवारं भ्रामयित्वा प्रोक्षयेत् ॥ ज्ञानतोऽज्ञानतो वापि
यद्यदाचरितं शिवे॥ तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वरि ॥
इति प्रार्थ्य ॥ गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि ॥
यत्र ब्रह्मादयो देवा न विदुः परमं पदम् ॥ निर्याणमुद्रया देवीं
स्वहृदि स्थापयेत् ततः ॥ संपूजकानां परिपालकानां जिते
न्द्रियाणां च तपोधनानाम् ॥ देशस्य राष्ट्रस्य कुलस्य राज्ञः
करोतु शांतिं भगवान्कुलेशः ॥ १ ॥ नंदंतु साधककुलान्यणि

माद्रिसिद्धयाशापाः पतंतु समयद्विषयोगिनीनाम् ॥ सा शांभवी स्फुरतु कापि ममाप्यवस्था यस्यांगुरोश्चरणपंकजमेव लभ्यम् ॥ २॥ शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तंबसंयुतम् ॥ कालाग्न्यादि शिवान्तं च जगद्यज्ञेन तृप्यतु ॥ ३ ॥ इति शांतिश्लोकान् पठित्वा ॥ विशेषार्घ्यपात्रम् आमस्तकपर्यंतमुद्धृत्य ॥ तत्क्षीरं पात्रांतरेणादाय ॥ आर्द्रं ज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि अहमेवाहं जुहोमि स्वाहा॥ इत्यात्मकुंडलिन्यग्नौ हुत्वा शेषं प्रियाशिष्याय दद्यात्॥ ततः यथाशक्ति ब्राह्मणसुवासिनीश्च भोजयित्वा स्वयमपि भुंजीत ॥ इति श्रीललिता नित्य सपर्यापद्धतिः ॥

मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग, मुंबई - ४०० ००४.

इति

श्रीललितानित्यसपर्या

पद्धतिः समाप्ता ।

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५.
फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-४२००७८.

KHEMRAJ SHRIKRISHNADA